ततश्चोपासकस्य प्रतीकैः समत्वादात्मग्रहो नोपपद्यते। न हि रुचकस्वस्तिकयोरितरेतरात्मत्वमस्ति किन्तु सुवर्णात्मत्वमेव। ब्रह्मात्मत्वेनैकत्वे प्रतीकाभावप्रसङ्गमवोचाम। अतो न प्रतीकेष्वात्मत्वदृष्टिः क्रियते" भा०। "ब्रह्मदृष्टिरुत्कर्षात्" भा०। "तेष्वेवोदाहरणेष्वन्यः संशयः किमादित्यादिदृष्टयो ब्रह्मण्यध्यसितव्याः? किं वा ब्रह्मदृष्टिरादित्यादिष्विति?। कुतः संशयः? सामानाधिकरण्ये कारणानवधारणात् अत्र हि ब्रह्मशब्दस्यादित्यादिशब्दैः सामानाधिकरण्यमुपलभ्यते "आदित्यो ब्रह्म" प्राणो ब्रह्म" "विद्युद्ब्रह्म" इत्यादिसमानविभक्तिनिर्देशात्। न चात्राञ्जसं समानाधिकरण्यमवकल्पते अर्थान्तरवचनत्वाद्ब्रह्मादित्यादिशब्दानां न हि भवति गौरश्व इति सामानाधिकरण्यम्। ननु प्रकृतिविकारभावाद्ब्रह्मादित्यादीनां मृच्छरावादिवत् सामानाधिकरण्यं स्यात् नेत्युच्यते विकारप्रविलयो ह्येवं प्रकृतिसामानाधिकरण्यात् स्यात् ततश्च प्रतीकाभावप्रसङ्गमवोचाम। परमात्मवाक्यञ्चेदन्तदानीं स्यात् ततश्चोपासनाधिकारो बाध्येत परिमितविकारोपादानञ्च व्यर्थम्। तस्माद्ब्रह्मणः "अग्निर्वैश्वानरः" इत्यादिवदन्यतरत्रान्यतरदृष्ट्यध्यासे सति किंदृष्टिरध्यस्यतामिति संशयः। तत्रानियमः नियमकारिणः शास्त्रस्याभावादित्येवं प्राप्तम्। अथवा आदित्यादिदृष्टय एव ब्रह्मणि कर्त्तव्या इत्येवं प्राप्तम् एवं ह्यादित्यादिदृष्टिभिर्ब्रह्मोपसनञ्च फलवदिति शास्त्रमर्य्यादा। तस्माच्च ब्रह्मदृष्टिरादित्यादिष्वित्येवं प्राप्ते ब्रूमः। ब्रह्मदृष्टिरेवादित्यादिषु स्यादिति। कस्मात्? उत्कर्षात् एवमुत्कर्षेणादित्यादयो दृष्टा भवन्ति उत्कृष्टदृष्टेस्तेष्वध्यासात्। तथा च लौकिको न्यायोऽनुसृतो भवति। उत्कृष्टदृष्टिर्हि निकृष्टेऽध्यसितव्येति लौकिको न्यायः यथा राजदृष्टिः क्षत्तरि, स चानुगन्तव्यः विपर्य्यये प्रत्यवायप्रसङ्गात्। न हि क्षत्तृदृष्टिपरिगृहीतो राजा निकर्षं नीयमानः श्रेयसे स्यात्। ननु शास्त्रप्रामाण्यादनाशङ्कनीयोऽत्र प्रत्यवायप्रसङ्गः न च लौकिकेन न्यायेन शास्त्रीया दृष्टिर्नियन्तुं युक्तेति। अत्रोच्यते निर्द्धारिते शास्त्रार्थे एतदेवं स्यात् सन्दिग्धे तु तस्मिंस्तन्निर्णयं प्रति लौकिकोऽपि न्याय आश्रीयमाणो न विरुध्यते। तेन चोत्कृष्टदृष्ट्यध्यासे शास्त्रार्थेऽवधार्य्यमाणे निकृष्टदृष्टिमध्यस्य प्रत्यवेयादिति श्लिष्यते। प्राथम्याच्चादित्यादिशब्दानां मुख्यार्थत्वमविरोधाद्ग्रहीतव्यम्। तैः स्वार्थवृत्तिभिरवरुद्धायां बुद्धौ पश्चादवतरतो ब्रह्मशब्दस्य मुख्यवृत्त्या सामानाधिकरण्यासम्भवाद्ब्रह्मदृष्टिविधानार्थतैवावतिष्ठते। इतिपरत्वादपि ब्रह्मशब्दस्यैव एषोऽर्थो न्याय्यः। तथा हि ब्रह्मेत्यादेशः ब्रह्मेत्युपासीत, ब्रह्मेत्युपास्त इति च सर्व्वत्रेतिपरं ब्रह्मशब्दमुच्चारयति शुद्धांस्त्वादित्यादिशब्दान्। ततश्च यथा शुक्तिकां रजतमिति प्रत्येतीत्यत्र शुक्तिवचन एव शुक्तिकाशब्दः रजतशब्दस्तु रजतप्रतीतिलक्षणार्थः प्रतीत्यैव हि केवलं रजतमिति न तु तत्र रजतमस्ति, एवमत्राप्यादित्यादीन् ब्रह्मेति प्रतीयादिति गम्यते। वाक्यशेषोऽपि च द्वितीयानिर्देशेनादित्यादीनेवोपास्तिक्रियया व्याप्यमानान् दर्शयति "स य एतदेवं विद्वानादित्यं ब्रह्मेत्युपास्ते" "यो वाचं ब्रह्मेत्युपास्ते "यः सङ्कल्पं ब्रह्मेत्युपास्त" इति। यत्तूक्तं ब्रह्मोपासनमेवात्रादरणीयं फलवत्त्वायेति तदयुक्तं उक्तेन न्यायेनादित्यादीनामेवोपास्यत्वस्यावगमात्। फलन्त्वतिथ्याद्युपासन इवादित्याद्युपासनेऽपि ब्रह्मैव दास्यति सर्वाध्यक्षत्वात्। वर्णितञ्चैतत् "फलमत उपपत्ते रित्यत्र"। ईदृशञ्चात्र ब्रह्मण उपास्यत्वं यत्प्रतीकेषु तद्दृष्ट्यध्यारोपणं प्रतिमादिष्विव विष्ण्वादीनाम्" भा०। एवं प्रतीकोपासनं निरूप्य तत्फलमुक्तम् तत्रैव ४अ० ३पादे

"अप्रतीकालम्बनान्नयतीति वादरायण उभयथाऽदोषात्तत्क्रतुश्च" सू०। "स्थितमेतत् कार्य्यविषया गतिर्न परविषयेति। इदमिदानीं सन्दिह्यते किं सर्व्वान् विकारालम्बनानविशेषेणैवामानवः पुरुषः प्रापयति ब्रह्मलोकम्? उत कांश्चिदेवेति?। किं तावत् प्राप्तं सर्वेषामेवैषां विदुषामन्यत्र परस्माद्ब्रह्मणो गतिः स्यात्। तथा हि नियमः सर्व्वासामीत्यत्राविशेषेणैवैषा विद्यान्तरेष्ववतारितेत्येवं प्राप्ते प्रत्याह। अप्रतीकालम्बनानिति। प्रतीकालम्बनान् वर्जयित्वा सर्व्वानन्यान् विकारालम्बनान्नयति ब्रह्मलोकमिति बादरायणाचार्य्यो मन्यते। न ह्येवमुभयथाभावाभ्युपगमे कश्चिद्दोषोऽस्ति। अनियमन्यायस्य प्रतीकव्यतिरिक्तेष्वप्युपासनेषूपपत्तेः। तत्क्रतुश्चास्योभयथाभावस्य समर्थको हेतुर्द्रष्टव्यः। यो हि ब्रह्मक्रतुः स ब्राह्मणमैश्वर्य्यमासीदेदिति श्लिष्यतरं "यथा यथोपासते तदेव भवतीति" श्रुतेः। न तु प्रतीकेषु ब्रह्मक्रतुत्वमस्ति प्रतीकप्रधानत्वादुपासनस्य। ननु अब्रह्मक्रतुमानपि ब्रह्म गच्छतीति श्रूयते यथा पञ्चाग्निविद्यायां सएनान् ब्रह्म गमयतीति"। भवतु यत्रैवमाहत्य वाद उपलभ्यते, तद्भावे-